**QP CODE: S9009**

**Enrollment number : ..........................................**

**Name : ..........................................**

**BA DEGREE EXAMINATION,AUGUST 2023**
**First Semester**
**BA Sanskrit Language and Literature**
**B21SN01DC - संस्कृताध्ययनविधि:**
**2022 ADMISSIONS**

**Time: 3 Hours** **Max Marks: 70**

## Section A

**एकपदेन वाक्येन वा केषाञ्चित् दशप्रश्नानाम् उत्तराणि लिखत।**

1. बालशब्दस्य पञ्चमी एकवचनरूपं किम् ?
2. नद्या इत्यस्य अन्तलिङ्गविभक्तिवचनानि कानि ?
3. भूधातोः लिट् लकारे प्रथमपुरुषरूपाणि कानि ?
4. वन्द् धातोः आत्मनेपदी लङ् लकारे उत्तमपुरुषरूपाणि कानि ?
5. जुगोप गोरूपधरामिवोर्वीम् - कां जुगोप ?
6. कः स्वं यशः श्रुतवान् ?
7. नन्दिनीं कः बलेन चकर्ष ?
8. विनाश्य रक्ष्यं स्वयमक्षतेन - अत्र रक्ष्यं किम् ?
9. विभाण्डकसूनुः कः ?
10. का नाम ताटका ?
11. अरण्यानी - अस्य समानार्थं पदं किम् ?
12. आसीत् इति क्रीयापदस्य लकारः कः ?
13. समम् इति पदस्य योगे का विभक्तिः प्रयोक्तव्या ?
14. पश्यसि इति क्रियापदस्य धातुः कः ?
15. राघवौ + अपि - सन्धत्त ?

**(1x10=10)**

## Section B

**एकवाक्येन द्वाभ्यां वा केषाञ्चित् पञ्चप्रश्नानाम् उत्तराणि लिखत।**

16. मति शब्दस्य द्वितीयायां तृतीयायां च रूपाणि लिखत ?
17. तद् शब्दस्य स्त्रीलिङ्गे सप्तम्यां रूपाणि कानि ?
18. न्यषेधि शेषोप्यनुयायिवर्गः - केन ? कुतः ?
19. धेनोः श्रृङ्गान्तरं का किमर्थं पूजयामास ?

20. स्थातुं नियोक्तुः न हि शक्यते - कुतः ?
21. दशरथपुत्राः केषु नैपुण्यं प्रापुः ?
22. दशरथस्य कति भार्याः आसन् ? ताःकाः ?
23. वृक्षपदस्य चत्वारि पर्यायपदानि लिखत ?
24. कोटरम् - मञ्जरी इत्यनयोः कः अर्थभेदः ?
25. प्रतस्थे - व्याकरणविशेषं लिखत ?

**(2x5=10)**

## Section C

**एकखण्डिकया केषाञ्चित् षड्प्रश्नानाम् उत्तराणि लिखत ।**

26. वन्द् धातोः लटि लृटि च रूपाणि लिखत ?
27. प्रसादचिह्नानि पुरः फलानि - विशदयत ?
28. श्रुतेरिवार्थं स्मृतिरन्वगच्छत् - ससन्दर्भं व्याख्यात ?
29. पपात विद्याधरहस्तमुक्ताः - किं कस्योपरि पपात ?
30. बाललताः दिलीपाय कीदृशमुपचारं चक्रुः ?
31. सुबाहुमारीचयोः वधं बालरामायणानुसारं विशदयत ?
32. दशरथस्य पुत्रोत्पत्तिं विशदयत ?
33. अपुत्रस्य पुत्रजन्म तवेदमागमनं मन्ये - विशदयत ?
34. परशुरामस्य गर्वभङ्गं विशदयत ?
35. भूधातोः लृटि लुटि च सर्वाणि रूपाणि लिखत ?
36. कृञ् धातोः परस्मैपदी लटि लिटि च सर्वाणि रूपाणि लिखत ?
37. नकारान्त - पुल्लिङ्ग- राजन् शब्दस्य सर्वाणि रूपाणि लिखत ?

**(5x6=30)**

## Section D

**पुटैकेन द्वाभ्यां वा केषाञ्चित् द्वयोः प्रश्नयोः उत्तराणि लिखत।**

38. दिलीपेन कृतं नन्दिनीपरिचरणं वर्णयत ?
39. रघुवंशमधिकृत्य सिंहदिलीपयोः सम्भाषणमुपन्यस्यत ?
40. बालरामायणे बालकाण्डस्य कथासारं लिखत ?
41. युष्मद् शब्दस्य वारि शब्दस्य च सर्वाणि रूपाणि लिखत ?

**(10x2=20)**